नामांक Roll No.

Sl.No. :

No. of Questions – 23

No. of Printed Pages – 07

**VU–87–Sahit. Shas.**

# वरिष्ठ उपाध्याय परीक्षा, 2023

# VARISHTHA UPADHYAYA EXAMINATION, 2023

## साहित्य – शास्त्रम्

समय : 3 घण्टे 15 मिनिट

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्य निर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः।

2) **सर्वे** प्रश्नाः समाधेयाः।

3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।

4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेखनीयानि।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

## खण्ड–अ

**1)** वस्तुनिष्ठप्रश्नाः **[12×1=12]**

i) चन्द्रालोकेऽलङ्काराः वर्णिताः सन्ति। **[1]**

अ) पञ्चममयूखे ब) तृतीयमयूखे

स) चतुर्थमयूखे द) षष्ठमयूखे

ii) वाक्ययोरर्थसामान्येऽङ्लकारो भवति – **[1]**

अ) व्यतिरेकः ब) प्रतिवस्तूपमा

स) दृष्टान्तः द) आवृत्तिदीपकम्

iii) रस्यते आस्वाद्यते इति – **[1]**

अ) भावः ब) अनुभावः

स) विभावः द) रसः

iv) चन्द्रालोकानुसारं रीतयः सन्ति – **[1]**

अ) सप्त ब) तिस्रः

स) चतस्रः द) पञ्च

v) स्वल्पसमासा रीतिर्भवति – **[1]**

अ) वैदर्भी ब) पाञ्चाली

स) गौडी द) लाटी

vi) पदार्थबोधवर्तनानुकूलो व्यापारविशेषो कथ्यते। **[1]**

अ) अभिधा ब) लक्षणा

स) व्यञ्जना द) वृत्तिः

vii) गुणीभूतव्यङ्ग्यमत् काव्यं कथ्यते – **[1]**

अ) ध्वनिकाव्यम् ब) उत्तमकाव्यम्

स) मध्यमकाव्यम् द) अधमकाव्यम्

viii) चन्द्रालोकस्य दशममयूखस्य विषयोऽस्ति – [1]

अ) व्यञ्जना विचारः   ब) लक्षणा–विचारः

स) अभिधा–विचारः   द) रस–विचारः

ix) रामगिर्याश्रमेषु वसतिं चक्रे – [1]

अ) यक्षः   ब) मेघः

स) कालिदासः   द) जनकतनया

x) याञ्चा मोघा भवति – [1]

अ) अधमे   ब) मेघे

स) भुवनविदिते वशे   द) अधिगुणे

xi) कैकेयी पुत्रभरतस्य कृते किं इच्छति। [1]

अ) मातुलगृह गमनम्   ब) राज्याभिषेकम्

स) चतुर्दशवर्षाणां वनगमनम्   द) राजभवनम्

xii) भरतः रामेणसह मेलितुं कुत्र गतवान्? [1]

अ) नैमिषारण्यम्   ब) त्रिकूटपर्वतम्

स) सुमेरूपर्वतम्   द) दण्डकारण्यम्

**2)** रिक्तस्थानानि पूरयत – **[6×1=6]**

i) ................. द्विधार्थाश्चेत्क्रमादेकैकमन्विता। [1]

ii) ................. श्लेषकाकुभ्यां वाच्यार्थान्तरकल्पनम्। [1]

iii) ................. मिन्दुत्वमिव वाच्येन साम्यभृत। [1]

iv) प्रयोजनाच्च सम्बद्धं वदन्ती ................. मता। [1]

v) कामार्ता हि ................. चेतनेषु। [1]

vi) ................. भृशं शिथिलदेहमतिर्नरेन्द्रः। [1]

**3)** अतिलघूत्तरात्मकाः प्रश्नाः **[12×1=12]**

i) ''या दातुः सौम्यता सेयं सुधांशोरकलंकता'' इत्यत्र कोऽलंकारो विद्यते? **[1]**

ii) ''विनापि स्यात्कारणं कार्यजन्म चेत्'' इत्यत्र कोऽलंकारो विद्यते? **[1]**

iii) रसमात्रे कारणं किम्? **[1]**

iv) श्रृंगाररसस्य स्थायीभावः वर्तते? **[1]**

v) व्यंजनात्मको व्यापारः कीदृशो भवति? **[1]**

vi) श्रोतृवैशिष्ट्याद् वक्तृस्यूतव्यङ्ग्यं कतिविधं भवति? **[1]**

vii) गुणीभूतव्यङ्ग्यं कतिविधं भवति? **[1]**

viii) चन्द्रालोके लक्षणा कस्मिन् मयूखे वर्णिता? **[1]**

ix) परिणतफलोभिः काननाम्रैः छन्नोपान्तः कः गिरिः वर्तते? **[1]**

x) रन्तिदेवस्य कीर्तिरुपा का नदी वर्णिता? **[1]**

xi) रावणस्य कथनानुसारं काञ्चनमृगः कुत्र निवसति स्म? **[1]**

xii) सीतायाः रक्षणकाले रावणेन सह युद्धं कुर्वन् कः वीरगतिं प्राप्तवान्? **[1]**

## खण्ड–ब

लघूत्तरात्मकाः प्रश्नाः **[13×2=26]**

**4)** त्वद्भक्तानां नमत्यंगं भंगमेति भवक्लमः इत्यत्रकोऽलंकारः? तल्लक्षणं लिखत। **[2]**

**5)** गतेऽपि सूर्ये दीपस्थास्तमश्छिन्दन्ति तत्कराः इत्यत्र कोऽलंकारः? तल्लक्षणं लिखत। **[2]**

**6)** वीररसस्य स्वरूपं प्रकटयत। **[2]**

**7)** तुल्यप्राधान्यगुणीभूतव्यङ्ग्यस्य स्वरूपं लिखत। **[2]**

8) अभिधावृत्तेः स्वरूपं लिखत। [2]

9) आशाबन्धः कुसुमसदृशं प्रग्यशो ह्यङ्गनानाम् सूक्तेः भावार्थो लेख्यः। [2]

10) किं विधा सारङ्गा मेघस्य मार्गं सूचयिष्यन्ति। [2]

11) उज्जयिन्याम भिसारिकाणां स्थितिं विवेचयत। [2]

12) अलकापुर्याः सौन्दर्यं महाकविना कथं वर्णितम्? [2]

13) स्वः पुत्रः कुरूते पितुर्यदिवचः कस्तत्र भोः! विस्मयः इति सूक्तेः भावार्थो लेखनीयः। [2]

14) ''हा हा गताः किल वनं वत मे तनूजा'' इति पंक्ते सप्रसंग-व्याख्या करणीया। [2]

15) ''समुदितबलवीर्यं रावणं नाशयित्वा'' इत्यत्र छन्दः परिचीय तल्लक्षणं लेखनीयम्। [2]

16) ''रेणुः समुत्पतति लोघ्रसमानगौरः'' इत्यत्र गणचिन्हनानि योजयित्वा छन्दो नाम लेखनीयम्। [2]

## खण्ड-स

17) निम्नलिखितयोः कारिकयोः एकस्याः कारिकायाः व्याख्या करणीया। [3]

क) हास स्थायी रसो हास्यो विभावाद्यैयथाक्रमम्।
वैरूप्यफुल्लगण्डत्वावहित्थाद्यैः समन्वितः।।

ख) निर्वेदस्थायिकः शान्तः सत्सङ्गादिविभावभूः।
क्षमादिकानुभावोऽयं स्तम्भादिव्यभिचारिकः।।

18) निम्नलिखितयोः कारिकयोः एकस्याः कारिकायाः व्याख्या करणीया – [3]

क) लक्षणीय स्वशब्दस्य मीलनामीलनाद् द्विधा।
लक्षणा सा त्रिधा सिद्धसाध्यसाध्याङ्गभेदतः।।

ख) तथा सहेतुस्तथा भेदभिन्ना च कुत्रचित्।
सौन्दर्येणैष कन्दर्पः सा मूर्तिमती रतिः।।

19) अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसंगभावार्थो लेखनीयः। [3]

क) जातवंशे भुवनविदिते पुष्कराऽवर्तकानां।
जानामि त्वां प्रकृतिपुरूषं कामरुपं मधोनः।।
तेनार्थित्वं त्वयिविधिवशाद् दूरबन्धुर्गतोऽहं।
याम्चा मोघा वरमधिगुणे नाधमे लब्धकामा।।

ख) प्राप्यावन्तीनुदयनकथाकोविद्गामवृद्धान्।
पूर्वोद्दिष्टामुपसर पुरीं श्रीविशालां विशालाम्।।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां।
शेषैः पुण्यैर्हृतमित दिवः कान्तिमत खण्डमेकम्।।

20) प्रतिमानाटकस्य पञ्चमाङ्कस्य कथासारः संस्कृतेन स्वशब्दैः लेखनीयः। [3]

अथवा

महाराजदशरथस्य चरित्रचित्रणं लेखनीयम्।

## <u>खण्ड–द</u>

21) निम्नलिखितयोः कारिकयोः एकस्याः कारिकायाः व्याख्या करणीया। [4]

क) सामुख्यं विदधानायाः स्फुटमर्थान्तरे गिरः।
कटाक्ष इव लोलाक्ष्या व्यापारो व्यञ्जनात्मकः।।

ख) द्वौ विवक्षितवाच्यस्य लक्ष्यालक्ष्यक्रमात्मकौ।
चत्वारिंशधुतैकेन भेदाः षट्चानयोः क्रमात्।।

22) अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसंग–व्याख्या करणीया। [4]

क) पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नैः।

नीडारम्भैर्गृह बलिभुजामाकुलग्रामचैत्या।।

त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः।

सम्पत्स्यन्ते कतिपयदिन स्थायिहंसा दशार्णाः।।

ख) शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः।

संसक्ता भिस्त्रिपुरविजयो गीयते किन्नरीभिः।।

निर्हादस्ते मुरज इव चेत्कन्दरेषु ध्वनिः स्यात्।

सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः।।

23) अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसंग व्याख्या विधेया। [4]

क) अनुचरति शशांकं राहुदोषेऽपि तारा।

पतति च वनवृक्षे याति भूमिं लता च।।

त्यजति न च करेणुः पंकलग्नं गजेन्द्रः।

व्रजतु चरतु धर्म भर्तृनाथा हि नार्यः।।

ख) पितुर्नियोगादहमागतो वनं।

न वत्स दर्पान्न भयान्न विभ्रमात्।।

कुलं च नः सत्यधनं ब्रवीमि ते।

कथं भवान् नीचपथे प्रवर्तते।।

✠ ✠ ✠

DO NOT WRITE ANYTHING HERE